२६ २७ २८ २९ उक्तलक्षणोवृषोगृहेनधार्यः तंभारवाहकंनकुर्यादित्यर्थः यथाकपिलागौर्ब्राह्मणातिरिक्तवर्णैर्गृहेधार्यानभवति किंतुदातव्याएव तथैवायमप्यवश्यंमोक्तव्यएवेति तदर्थंएतस्मिन्नेवार्थेपुरातनीसर्वशास्त्रप्रसिद्धागाथास्मृतिश्चरतिलोकेविख्यातिंयाति ३० तामेवाह इष्टव्यावांछितव्याः

लोहितोयस्तुवर्णेनमुखेपुच्छेचपांडुरः पिंगःखुरविषाणाभ्यांरक्तनीलोनिगद्यते २६ सर्वांगेष्वेकवर्णोयःपिंगःपुच्छेखुरेषुयः तंनीलपिंगमित्याहुःपूर्वजोद्धारकारकम् २७ पारावतसवर्णस्तुललाटेतिलकान्वितः तंबभ्रुनीलमित्याहुःपूर्णंसर्वांगशोभनम् २८ नीलःसर्वशरीरेषुरक्तश्चनयनद्वये तमप्याहुर्महानीलंनीलःपंचविधःस्मृतः २९ अवश्यमेवमोक्तव्योनसधार्योगृहेभवेत् तदर्थमेषाचरतिलोकेगाथापुरातनी ३० इष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत् गौरींविवाहयेत्कन्यांनीलंवावृषमुत्सृजेत् ३१ सएवपुत्रोमंतव्योवृषोत्सर्गंतुयश्चरेत् गयायांश्राद्धदाताचयोन्योविश्वासमःकिल ३२

ममबहवःपुत्राःसंत्वितीच्छाकर्तव्येत्यर्थः ततकिमर्थमितिचेत्तत्राह यदीति बहुष्वेकोपिगयांगच्छेत् एकःगौरीमष्टवर्षांकन्यांच नीलमुक्तलक्षणं मोचयेदितिहेतोः एकएवचेत्तदागृहकार्यएवव्यग्रोभवेत् तस्यगयादिपितृमुक्तिकृत्येनत्सराभवादितिभावः ३१ अन्यद्वृषोत्सर्गाद्यकर्ताइत्यकरणे;पमानोक्तिः ३२

करणेतुकेवलंपितुरेवमुक्तिर्नकिंतुसर्वपितॄणामेवेत्याह रौरवादिष्विति ३३ स्वर्गताः स्वर्गेस्थिताअपिइच्छंतिपरमगतिप्राप्त्यर्थम् ३४ ३५स

रौरवादिषुयेकेचित्पच्यंतेयस्यपूर्वजाः वृषोत्सर्गेणतान्सर्वान्तारयेदेकविंशतिः ३३ वृषोत्सर्गंकिलेच्छंति पितरःस्वर्गताअपि अस्मद्वंशेसुतःकोपिवृषोत्सर्गंकरिष्यति ३४ तदुत्सर्गाद्वयंसर्वेयास्यामःपरमांगतिम् सर्वयज्ञेषुचास्माकंवृषयज्ञोहिमुक्तिदः ३५ तस्मात्पितृविमुक्त्यर्थंवृषयज्ञंसमाचरेत् यथोक्तेनविधानेन नकुर्यात्सर्वप्रयत्नतः ३६ ग्रहाणांस्थापनंकृत्वातत्तन्मंत्रैश्चपूजनम् होमंकुर्यात्तयथाशास्त्रंपूजयेद्वृषमातरः ३७ वत्सांवत्सींसमानाय्यबध्नीयात्कंकणंतयोः वैवाह्येनविधानेनस्तंभमारोपयेत्तदा ३८ स्नापयेच्चवृषंवत्सींरुद्रकुंभोदकेनच गंधमाल्यैश्चसंपूज्यकारयेच्चप्रदक्षिणां ३९ त्रिशूलंदक्षिणेपार्श्वेवामेचक्रंप्रदापयेत् तं विमुच्यांजलिंबध्वापठेन्मंत्रमिमंसुतः ४० धर्मस्त्वंवृषरूपेणब्रह्मणानिर्मितःपुरा तवोत्सर्गप्रदानेनतारयस्व भवार्णवात् ४१

र्वप्रयत्नतः यदिदेशेनास्तितदादेशांतरादप्यानीयकर्तव्यएवेत्यर्थः ३६ विधानमाह ग्रहाणामिति सप्तभिः ३७ ३८ ३९ ४० धर्मइतिचतुष्पाद्धर्मोवृषरूपोहिभवतीति उत्सर्गस्त्यागएवप्रदानंमयादत्तंतवाभयदानंतेनतारयस्व ममपितॄनितिशेषः४१

